# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा - आचार्य-१, सेमेस्टर-१** | **प्रश्नपत्रम् - ५** | **गुणाः - ७०** |
| **विषयः - पुराणेतिहासः** | **कोड - CE-4.1.1** | **समयः - ०३-०६** |
| **दिनाङ्कः - ९.१२.२०१६** | **ग्रन्थः - पुराणविमर्शः** | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ अधोलिखितयोः एकस्य सप्रसङ्गं व्याख्या कार्या । ०४**

(१) *अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।*
*मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥*

(२) *धर्मार्थकाममोक्षाणामुपदेशसमन्वितम् ।*
*पूर्ववृत्तकथायुक्तमितिहासं प्रचक्षते ॥*

**प्रश्नः २ कस्यस्याप्येकस्य सविस्तरणोत्तरं लिखत । १२**

*१. अष्टादशपुराणानि विलिख्य कस्याप्येकस्य सारं लिखत ।*
*२. पुराणलक्षणं विलिख्य तन्महत्त्वं विस्तारेण लिखत ।*

**प्रश्नः ३ कयोश्चिद् द्वयोः लघूत्तरे लिखत । ०४**

*(१) व्यासस्य वचनद्वयं लिखत ।*
*(२) पुराणस्य पञ्चलक्षणानि लिखत ।*
*(३) चत्वारः आश्रामाः लेख्याः ।*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ४ कस्यस्याप्येकस्य ससन्दर्भप्रसङ्गसहितं संस्कृते व्याख्या कार्या । ०४**

(१) *त्र्य्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ।*
*वैशम्पायनहारितो षड्वै पौराणिका इमे ॥*

(२) *मन्वन्तरं मनुर्देवा मनुपुत्रा सुरेश्वरः ।*
*ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥*

**प्रश्नः ५ कस्याप्येकस्य सविस्तरेणोत्तरं लिखत । ०८**

*१. व-चतुष्टयमित्यत्रागतानां पुराणानां विस्तरेण परिचयो देयः ।*
*२. श्रीमद्भागवतस्य अर्थं विलिख्य दशमस्कन्धस्य सारांशं लिखत ।*

**प्रश्नः ६ अधोलिखितेभ्यः त्रयाणामुत्तराणि यच्छत । ०३**

*(१) व्यासस्य मातुः नाम किम् ?*
*(२) विद्यावतां कुत्र परीक्षा ?*
*(३) भागवते कति स्कन्धाः ?*
*(४) त्रिविधतापाः के ?*

**तृतीयान्वितिः ( युनिट - ३ )**

**प्रश्नः ७ कस्याप्येकस्य ससन्दर्भप्रसङ्गं संस्कृते व्याख्या कार्या । ०४**

(१) *इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।*

(२) *परमात्मा च सर्वेषामाधारः परमेश्वरः ।*
*विष्णुनामा स वेदेषु वेदान्तेषु च गीयते ॥*

**प्रश्नः ८ कस्याप्येकस्य सविस्तरमुत्तरं लिखत । ०८**

*१. चातुर्वर्ण्यव्यवस्थां विलिख्य तद्धर्मान् लिखत ।*

*२. पौराणिकीं सृष्टिप्रक्रियां विलिख्य प्रलयस्य प्रकारविवेचनं कुरुत ।*

**प्रश्नः ९ केषाञ्चित् त्रयाणां लघूत्तराणि यच्छत । ०३**

*(१) ब्राह्मणस्य षड्कर्माणि लिखत ।*

*(२) ब्रत्रयं लिखत ।*

*(३) महाभारतस्य मङ्गलं लिखत ।*

*(४) रामायणे कति काण्डानि ।*

**चतुर्थान्वितिः ( युनिट - ४ )**

**प्रश्नः १० कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

(१) *अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत् ।*
*कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥*

(२) *अहमेवासमेवाग्रे नान्यद् यत् सदसत्परम् ।*
*पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥*

**प्रश्नः ११ द्वयोः कस्यचिदेकस्य उत्तरं यच्छत । ०८**

*१. वेद-पुराण प्रोक्तानां मुख्यदेवानां महत्त्वं प्रतिपादयत ।*

*२. पुराणशैलीं प्रदर्श्य अवतारवादस्य चर्चां विस्तारेण कुरुत ।*

**प्रश्नः १२ कयोश्चित् द्वयोः लघूत्तरे यच्छत । ०४**

*(१) अष्टाङ्गयोगस्य नामानि लिखत ।*

*(२) स्मृतिशास्त्रमर्थात् किम् ? व्युत्पत्तिं प्रदर्शयत् ।*

*(३) पुराणशब्दस्य प्रथमाविभक्तिं लिखत ।*

=०=